आध्मानञ्च प्रत्याध्मानं वाताष्ठीला प्रत्यष्ठीला ।"तूणी च प्रतितूणी च वह्निवैषम्यमेव च । आटोपः पार्श्वशूलञ्च त्रिकशूलं तथैव च । मुहुश्च मूत्रलं मूत्रनिग्रहो मलगाढता । पुरीषस्याप्रवृत्तिश्च गृध्रसी च ततः परम् । कलायखञ्जता चापि खञ्जता पङ्गुता तथा । क्रोष्टुशीर्षक खल्ली च वातकण्टक एव च । पादहर्षौ पाददाह आक्षेपो दण्डकाभिधः । वातपित्तकृताक्षेपस्तथा दण्डापतानकः । अभिघातकृताक्षेप आयामो द्विविधः स्मृतः । आन्तरश्च तथा बाह्यो धनुर्वातश्च कुब्जकः । अपतन्त्रोपतानश्च पक्षाघातोऽखिलाङ्गकः । कम्पस्तम्भो व्यथातोदो भेदश्च स्फुरणं तथा । रौक्ष्यं कार्श्यञ्च काष्र्ण्यञ्च शैत्यं लोम्नाञ्च हर्षणम् । अङ्गमर्दोऽङ्गविभ्रंशः सिरासङ्कोच एव च । अङ्गशोषश्च भीरुत्वं मोहश्चञ्चलचित्तता । निद्रानाशः स्वेदनाशो बलहानिस्तथैव च । शुक्रक्षयो रजोनाशो गर्भनाशः परिश्रमः । एत एकाशीतिसंख्यारोगा योगेन रूढितः । वातव्याधीतिनामानो मुनिभिः परिकीर्त्तिताः" । एत एव शिरोग्रहादय एव । योगेन वातेन वाताद्वा व्याधिर्वातव्याधिरिति निरुक्त्या तदा वातज्वरादिष्वपि प्रसङ्गः स्यादत आह रूढितः प्रसिद्धितः शिरोग्रहादयोऽशीतिरेव वातव्याधिसंज्ञाः प्रसिद्धा न तु वातज्वरादयः" । तल्लक्षणादिकं तत्र दृश्यम् ।

**वातक** पु० वात इव चञ्चलः इवार्थे कन् । १असनपर्ण्याम् स्वार्थे क । २जारे च ।

**वातकर्म्मन्** न० वातानां कर्म । अपानेन मरुत्त्यागे पर्दने ।

**वातकिन्** त्रि० वातोऽस्त्यस्य इनि कुक् च । वातरोगयुक्ते अमरः स्त्रियां ङीप् ।

**वातकेतु** पु० वातस्य केतुरिव । धूलौ रजसि त्रिका० ।

**वातगुल्म** पु० वातेन गुल्म इव । १वातुले त्रिका० । २वातनिमित्ते गुल्मरोगभेदे गुल्मशब्दे २६२६ पृ० दृश्यम् ।

**वातघ्नी** स्त्री वातं रोगभेदं हन्ति—हन-टक् ङीप् । १शालपर्ण्याम् (सालपानि) २अश्वगन्धायां ३शिमुड़ीक्षुपे च राजनि० ।

**वातचक्र** न० वृ०सं० २७अ०उक्ते पूर्वादिवातानां कालभेदेन शुभाशुभसूचके वहनभेदे

"पूर्वः पूर्वसमुद्रवीचिशिखरप्रस्फालनाघूर्णितश्चन्द्रार्कांशुसटाभिघातकलितो वायुर्यदाकाशतः । नैकान्तस्थितनीलमेघपटलां शारद्यसंवर्धितां वासन्तोत्कटसस्यमण्डिततलां विद्यात्तदा मेदिनीम् । यदाग्नेयो वायुर्मलयशिखरास्फालनपटुः प्लवत्यस्मिन् योगे भगवति पतङ्गे प्रवसति । तदा नित्योद्दीप्ता ज्वलनशिखरालिङ्गिततला स्वगात्रोष्मोच्छ्वासैर्वमति वसुधा भस्मनिकरम् । तालीपत्रलतावितानतरुभिः शाखामृगान्नर्तयन् योगेऽस्मिन् प्लवति ध्वनन्सुपरुषो वायुर्यदा दक्षिणः । सर्वोद्योगसमुन्नताश्च गजवत्तालाङ्कुशैर्घट्टिताः कीनाशा इव मन्दवारिकणिकान्मुञ्चन्ति मेघास्तदा । सूक्ष्मैलालवलीलवङ्गनिचयान् व्याघूर्णयन् सागरे भानोरस्तमये प्लवत्यविरतो वायुर्यदा नैरृतः । क्षुत्तृष्णाहृतमानुषास्थिशकलप्रस्तारभारच्छदा मत्ता प्रेतवधूरिवोग्रचपला भूमिस्तदा लक्ष्यते । यदा रेणूत्पातैः प्रविकटसटाटोपचपलः प्रवातः पश्चार्धं दिनकरकरापातसमये । तदा सस्योपेता प्रवरन्द्वराबद्धसमरा धरा स्थाने स्थानेऽप्यविरतवसामांसरुधिरा । आषाढीपर्वकाले यदि किरणततेरस्तकालोपपत्तौ वायव्यो बद्धवेगः प्लवति घनरिपुः पन्नगादानुकारी । जानीयाद्वारिधाराप्रमुदितमुदितां मुक्तमण्डूककण्ठां सस्योद्भासैकचिह्नां सुखबहुलतया भाग्यसेनामिवोर्वीम् । मेरुग्रस्तमरीचिमण्डलतले शीतावसाने रवौ वात्यास्फोदिकदम्बगन्धसुरभिर्वायुर्यदा चोत्तरः । विद्युद्भ्रान्तिसमस्तकान्तिकलनामत्तास्तदा तोयदा उन्मत्ता इव नष्टचन्द्रकिरणां गां पूरयन्त्यम्बुभिः । ऐशानो यदि शीतलोऽमरगणैः संसेव्यमानो भवेत् पुन्नागागुरुपारिजातसुरभिर्वायुः प्रचण्डध्वनिः । आपूर्णोदकयौवना वसुमती सम्पन्नसस्याकुला धर्मिष्ठाः प्रणतारयो नृपरयो रक्षन्ति वर्णांस्तदा" ।

**वाततूल** न० वातेन उड्डीयमानं तूलम् । (वुडिरसुता) आकाशे उड्डीयमाने सूत्रे हारा० । [२धूलौ ।

**वातध्वज** पु० वातो ध्वज इव यस्य १मेघे शब्दमा० । ६त० ।

**वातपोथ** पु० वातं रोगभेदं पुथ्यति हिनस्ति पुथ-अण् । पलाशवृक्षे अमरः । [मृगे (वाघोटा) अमरः ।

**वातप्रमी** पुंस्त्री० वातं प्रमिणोति प्र+मा-ई किच्च । १शीघ्रगे

**वातमज** पुंस्त्री० वातमनुलक्ष्य अजति अज-अच् व्यभावः । मृगभेदे जटा० स्त्रियां ङीष् । [जटा० स्त्रियां ङीष् ।

**वातमृग** पुंस्त्री० वातानुगो मृगः शाक० । शीघ्रगे मृगभेदे

**वातरक्त** न० वातजं दुष्टं रक्तम् रुधिरं यत्र । रोगभेदे

"लवणाम्लकटुक्षारस्निग्धोष्णाजीर्णभोजनैः । क्लिन्नशुष्काम्बुजानूपमांसपिण्याकमूलकैः । कुलत्थमाषनि-